रिति न बोधाद्दत्तिरिति वाच्यम् एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असम्भवात् । नच चरमपदे एव सा प्रत्ययार्थान्वयानुरोधात् प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम् एवं हि बहुव्रीह्यसम्भवापत्तेः "अनेकमन्यपदार्थे" इत्यनेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे तद्विधानात् । किञ्च एवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात् पूर्व्ववर्णानां तात्पर्य्यग्राहकत्वेनोपयोगसम्भवात् एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेदत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः । एवञ्च अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना उक्तशक्तेः अगत्या शक्त्यन्तरकल्पनेत्यर्थः क्लृप्तत्यागः इत्यस्य क्लृप्तशक्त्योपपत्तिरिति व्युत्पत्तित्यागश्च तत्रास्ति तत्किम् सर्व्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः । यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादायः न समासे शक्तिः राजपुरुष इत्यादौ राजपदादेः सम्बन्धिलक्षणयैव राजसम्बन्ध्यभिन्नः पुरुषइति बोधोपपत्तेः । अतएव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादिविशेषणान्वयः । न वा घनश्यामनिष्कौशाम्बिर्गोरथइत्यादौ इवादिप्रयोगापत्तिः उक्तार्थतया इवक्रान्तादिपदप्रयोगासम्भवात् । न वा "विभाषेति" सूत्रानावश्यकत्वम् लक्षणया राजसम्बन्ध्यभिन्नइति बुबोधयिषायां समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भवात् । नापि पङ्कजपदप्रतिवन्द्री शक्तिसाधिका तत्रावयवशक्तिमजानतोऽपि बोधात् । नच शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः सम्भवति । अतएव राजादिपदशक्त्यग्रहे राजपुरुषश्चित्रगुरित्यादौ न बोधः । नच चित्रगुरित्यादौ लक्षणासम्भवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असम्भवः बहुव्युत्पत्तिभञ्जनापत्तेरिति वाच्यम् प्राप्तोदक इत्यादावुदकपदे एव लक्षणास्वीकारात् । पूर्व्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात् । प्रत्ययानां सन्निहितपदर्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते विशिष्टस्यैव सङ्केतितत्वात् । बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् । प्रकृते चात्यन्तसान्निधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपदे एव सा कल्प्यतइति विशेषः स्वीकृतञ्च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकम्मन्यैरित्याहुः । अत्रोच्यते । समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात् अर्थवत्त्वाभावात् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यस्याप्रवृत्तेः। नच "कृत्तद्धितसमासाश्च"इत्यत्र समासग्रहणात् सा । तस्य नियमार्थतया भाष्यसिद्धताया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् । समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात् । अथ तिप्तस्झि इत्यारभ्य ङ्योस्सुबिति तिप्प्रत्याहारोभाष्यसिद्धः तमादायातिप्प्रातिपदिकमित्येव सूत्र्यताम् कृतमर्थवदादिसूत्रद्वयेन । समासग्रहणञ्च नियमार्थमस्तु तथा च सुप्तिङन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाव्याप्तितादवस्थ्यमेव । तथा च प्रातिपदिकसंज्ञारूपं कार्य्यमेवार्थवत्त्वमनुमापयति धूमइव वह्निम् । किञ्चैवं चित्रगुमानयेत्यादौ कर्म्मत्वाद्यनन्वयापत्तिः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् । यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति तन्न उपकुम्भं अर्द्धपिप्पलीत्यादौ पूर्व्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । न च तत्रापि सन्निधानमेव आनुशासनिकसन्निधेर्विवक्षितत्वात् तथा च यत्पदोत्तरं यानुशिष्टा सा तदर्थगतं स्वार्थं बोधयति । समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम् अर्थवत्सूत्रेण विशिष्टस्यैव विभक्त्यनुशासनात् । अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत्तर्हि पङ्कजमानय दण्डिनं पश्य शूलिनं पूजयेत्यादौ पङ्कदण्डशूलेष्वानयनदर्शनपूजनादेरन्वयप्रसङ्गात् अघटमानयेत्यत्र घटेप्यानयनान्वयापत्तेश्च । न च दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः । पाकान्नीलः धर्म्मात्सुखी इत्यादौ पाकधर्म्मादिहेतुताया रूपसुखादावनन्वयप्रसङ्गात् । यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति तन्न घटं पश्येत्यत्र घटपदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्यावश्यकत्वात् । अथ प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमितिचेन्न गामानयति कृष्णोदण्डेनेत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात् । अथ समस्यमानपदार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेन्न अक्लृप्तकल्पनां क्लृप्तव्युत्पत्तित्यागञ्चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक् । अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषः